श्लेष्मगुल्मविनाशाय शूलोदरविनाशनम् ॥
उग्रगन्धा च मरिचं क्षारचूर्णसमन्वितम् ।
पिबेन्मूत्रेण संयुक्तं श्लेष्मगुल्मविनाशनम् ॥”
इति श्लेष्मगुल्मचिकित्सा ॥ * ॥
“शुण्ठी सौवर्च्चलं भार्गी वत्सकं यावशूकजम् ।
जीरे द्वे पाटरूपञ्च यवानी हिङ्गुसैन्धवम् ॥
आरग्वधेन संयुक्तं चूर्णं सप्तमेव च ।
वातश्लेष्मोद्भवे गुल्मे सुखमाशुप्रपद्यते ।
उग्रगन्धा फलत्रिकं देवदारुपुनर्नवा ॥
त्रिवृत्सौवर्च्चलोपेतं क्षारोदकसमन्वितम् ।
पीतं वातकफे गुल्मे शुभकारि परं मतम् ॥”
इति वातश्लेष्मगुल्मचिकित्सा ॥ * ॥
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ॥
“रूक्षकृष्णारुणशिरा तन्तुजालगवाक्षित: ।
गुल्मोऽष्टधा पृथक् दोषै: संसृष्टैर्निचयं गत: ॥
आर्त्तवस्य च दोषेण नारीणां जायतेऽष्टम: ।
ज्वरच्छर्द्यतिसाराद्यैर्वमनाद्यैश्च कर्म्मभि: ॥
कर्षितो वातलान्यत्ति शीतं वाम्बुबुभुक्षित: ।
य: पिबत्यनुपानानि लङ्घनं प्लवनादिकम् ॥
सेवते देहसंक्षोभिच्छर्द्दिं वा समुदीरयेत् ।
अनुदीर्णामुदीर्णान् वा वातादीन् विसृजति ॥
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते ।
शुद्धो वाशु विदाहीनि भजते स्यन्दनानि वा ॥
वातोल्वणास्तस्य मला: पृथक् क्रुद्धास्त्रयोऽथवा ।
सर्व्वे वा रक्तयुक्ता वा महास्रोतोऽनुशायिन: ॥
ऊर्द्धाधोमार्गमावृत्य कुर्व्वते शूलपूर्व्वकम् ।
स्पर्शोपलभ्यं गुल्माख्यमुत्प्लुतं ग्रन्थिरूपिणम् ॥
कर्षणात् कफविट्पित्तैर्मार्गस्यावरणेन वा ।
वायु: कृताश्रय: कोष्ठे रौक्ष्यात् काठिन्यमागत: ।
स्वतन्त्र: स्वाश्रये दुष्ट: परतन्त्र: पराश्रये ॥
पिण्डितत्वादमूर्त्तोऽपि मूर्त्तत्वमिव संश्रित: ।
गुल्म इत्युच्यते वस्तिनाभिहृत्पार्श्व-संश्रय: ॥
वातान्मन्याशिर:शूलं ज्वरप्लीहान्त्रकूजनम् ।
व्यधा सूच्येव विट्सङ्ग: कृच्छ्रादुच्छ्वसनं मुहु: ॥
स्तम्भो गात्रे मुखे शोष: कार्श्यं विषमवह्निता ।
रूक्षकृष्णत्वगादित्वं चलत्वादनिलस्य च ॥
अनिरूपित-संस्थान-स्थानवृद्धिक्षयव्यथ: ।
पिपीलिकाव्याप्त इव गुल्म: स्फुरति तुद्यते ॥
पित्ताद्दाहोऽम्लको मूर्च्छा विड्भेदस्वेदतृड्-
ज्वरा: ।
हारिद्रत्वं त्वगाद्येषु गुल्मश्च स्पर्शनासह: ॥
दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च ।
कफात् स्तैमित्यमरुचि: सदनं शिशिरज्वर: ॥
पीनसालस्य-हृल्लास-कासशुक्लत्वगादिता: ।
गुल्मोऽवगाढ़: कठिनो गुरु: सुप्त: स्थिरोऽल्प-
रुक् ॥
स्वदोषस्थानधामान: स्वे स्वे काले च रुक्करा: ।
प्रायस्त्रयस्तु द्वन्द्वोत्था गुल्मा: संसृष्टलक्षणा: ॥
सर्व्वजस्तीव्ररुग्दाह: शीघ्रपाकी घनोन्नत: ।
सोऽसाध्यो रक्तगुल्मस्तु स्त्रिया एव प्रजायते ॥
ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ।
सेवते वातलानि स्त्री क्रुद्धस्तस्या: समीरण: ॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद्गर्भ-लिङ्गमाविष्करोति च ॥
हृल्लास दौहृदस्तन्य-दर्शनं क्षामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रुक्स्तम्भदाहातिसारतृड्ज्वरादीनुपद्रवान् ॥
गर्भाशये च सुतरां शूलं दुष्टास्रगाश्रये ।
जन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदना: ॥
न चाङ्गैर्गर्भवद् गुल्म: स्फुरत्यपि तु शूलवान् ।
पिण्डीभूत: स एवास्या: कदाचित् स्पन्दते चिरात् ॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ।
स दोषसंश्रयो गुल्म: सर्व्वो भवति तेन स: ॥”
इति वाभटे निदानस्थाने पञ्चमेऽध्याये ॥
“रूक्षान्नपानैरतिसेवनैर्वा
शोकेन मिथ्या प्रतिकर्म्मणा वा ।
विचेष्टितैर्वा विषमातिमात्रै:
कोष्ठे प्रकोपं समुपैति वायु: ॥
कफञ्च पित्तञ्च स दूषयित्वा
प्रोह्य मार्गान् विनिबध्य ताभ्याम् ।
हृत्प्लीहपार्श्वोदरवस्तिशूलं
करोत्यधो याति न बद्धमार्ग: ॥
पक्वाशये पित्तकफाशये वा
स्थित: स्वतन्त्र: परसंश्रयो वा ।
स्पर्शोपलभ्य: परिपिण्डितत्वात्
गुल्मो यथा दोषमुपैति नाम ॥
वस्तौ हि नाभ्यां हृदिपार्श्वयोर्वा
स्थानानि गुल्मस्य भवन्ति पञ्च ।
पञ्चात्मकस्य प्रभवन्तु तस्य
वक्ष्यामि लिङ्गानि चिकित्सितञ्च ॥
क्रियाक्रममत: सिद्धं गुल्मिनां गुल्मनाशनम् ।
प्रवक्ष्याम्यत ऊर्द्धञ्च योगान् गुल्मनिवर्हणान् ॥
रूक्षव्यायामजं गुल्मं वातिकं तीव्रवेदनम् ।
बद्धविट्-मारुतं स्नेहैरादित: समुपाचरेत् ॥
भोजनाभ्यञ्जनै: पानैर्निरूहै: सानुवासनै: ।
स्निग्धस्य भिषजा स्वेद: कर्त्तव्यो गुल्मशान्तये ॥
स्रोतसां मार्द्दवं कृत्वा जित्वा मारुतमुल्वणम् ।
भित्त्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति ॥
स्नेहपानं मतं गुल्मे विशेषेणोर्द्धनाभिजे ॥
हवुषाद्यं घृतम् ।
हवुषा व्योष पृथ्वीका चव्यचित्रकसैन्धव: ।
साजाजीपिप्पलीमूलैर्दीप्यकैर्विपचेद्घृतम् ॥
मातुलुङ्गदधिक्षीर-कोलमूलकदाड़िमै: ।
रसैस्तद्वातगुल्मघ्नं शूलानाहविमोक्षणम् ॥
योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरान् ।
वस्तिहृत्पार्श्वशूलञ्च घृतमेतद्व्यपोहति ॥”
इति हवुषाद्यं घृतम् ॥ * ॥
“तैलं प्रसन्ना गोमूत्रमारनालं यवाग्रज: ।
गुल्मजठरमानाहं पीतमेकत्र साधयेत् ॥”
इति तैलपञ्चकम् ॥ * ॥
“यथोक्तै: कोपनैर्दोषा: कुपिता: कोष्ठमागता: ।
जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते ॥
पञ्च गुल्माश्रया नृणां पार्श्वहृन्नाभिवस्तय: ।
कुपितानिलमूलत्वाद्गूढ़मूलोदयादपि ॥
गुल्मवद्वा विशालत्वाद् गुल्म इत्यभिधीयते ।
स यस्मादात्मनिचयं गच्छत्यप्स्विव बुद्बुद: ॥
अन्त: सरति यस्माच्च न पाकमुपयात्यत: ।
सदनं मन्दता वह्ने राटोपोऽन्त्रविकूजनम् ॥
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
द्वेषोऽन्ने वायुरूर्द्धञ्च पूर्व्वरूपेषु गुल्मिनाम् ॥
हृत्कुक्षिशूलं मुखकण्ठशोषो
वायोर्निरोधो विषमाग्निता च ।
ते ते विकारा: पवनात्मकाश्च
भवन्ति गुल्मेऽनिलसम्भवे तु ॥
स्वेदज्वराहारविदाहदाहा-
स्तृष्णाङ्गराग: कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि
पित्तात्मके तानि भवन्ति गुल्मे ॥
स्तैमित्यमन्नेऽरुचिरङ्गसाद
श्छर्द्दि: प्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि
भवन्ति गुल्मे कफसम्भवे तु ॥
सर्व्वात्मक: सर्व्वविकारयुक्त:
सोऽसाध्य उक्त: क्षतजञ्च वक्ष्ये ।
“न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम् ॥
तं गर्भकालातिगमे चिकित्स्य
मसृग्भवं गुल्ममुशन्ति तज्ज्ञा: ॥”
चिकित्सा यथा ॥
“वातगुल्मार्द्दितं स्निग्धं युक्तं स्नेहविरेचनै: ।
उपाचरेत् यथाकालं निरूहै: सानुवासनै: ॥
पित्तगुल्मार्द्दितं स्निग्धं काकोल्यादिघृतेन तु ।
विरिक्तं मधुरैर्योगैर्निरूहै: समुपाचरेत् ॥
श्लेष्मगुल्मार्द्दितं स्निग्धं पिप्पल्यादिघृतेन तु ।
तीक्ष्णैर्विरिक्तं तद्रूपैर्निरूहै: समुपाचरेत् ॥
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हित: ।
पित्तवद्रक्तगुल्मिन्या नार्य्या: कार्य्य: क्रियाविधि: ॥
विशेषमपरञ्चास्या: शृणु रक्तविभेदनम् ।
पलाश-भस्मतोयेन सिद्धं सर्पि: प्रयोजयेत् ॥
दद्यादुत्तरवस्तिञ्च पिप्पल्यादिघृतेन तु ।
उत्तर्णं भेदयेद्भिन्ने विधिरासृग्दरोहित: ॥
आनूपौदकमज्जानो वसा तैलं घृतं दधि ।
विपक्वमेकत: शस्तं वातगुल्मेऽनुवासनम् ॥
जाङ्गलैकशफानान्तु वसा सर्पिश्च पैत्तिके ।
तैलं जाङ्गलमाज्जान एवं गुल्मे कफोत्थिते ॥
धात्रीफलानां स्वरसे षड़ङ्गं विपचेद्घृतम् ।
शर्करा सैन्धवोपेतं तद्धितं वातगुल्मिने ॥
चित्रकव्योषसिन्धूत्थ पृथ्वीका चव्यदाड़िमै: ।
दीप्यकग्रन्थिकाजाजी हवुषा धान्यकै: समै: ॥
दध्यारनालबदर-मूलकस्वरसैर्घृतम् ।
तत् पिबेद्वातगुल्मार्त्तिदौर्ब्बल्याटोपशूलनुत् ॥
विड्दाड़िमसिन्धूत्थ-हुतभुग्व्योषजीरकै: ।
हिङ्गुसौवर्च्चलक्षार-रुग्वृक्षाम्लाम्लवेतसै: ॥
बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्मघ्नं प्लीहशूलजित् ॥